३६८. सरतीति **सतो**। अयं पन न याय कायचि सतिया सतो, अथ खो एदिसायाति दस्सेन्तो ‘‘**कायादिअनुपस्सनासतिया**’’ति आह। **चतुसम्पजञ्ञपञ्ञाया**ति चतुब्बिधसम्पजञ्ञपञ्ञाय, अभिक्कमनं अभिक्कन्तन्ति आह – ‘‘**अभिक्कन्तं वुच्चति गमन**’’न्ति। तथा पटिक्कमनं पटिक्कन्तन्ति वुत्तं – ‘‘**पटिक्कन्तं निवत्तन**’’न्ति। निवत्तनञ्च निवत्तिमत्तं, निवत्तित्वा पन गमनं गमनमेव। **कायं अभिहरन्तो** अभिगमनवसेन कायं नामेन्तो। ठाननिसज्जासयनेसु यो गमनादिविधिना कायस्स पुरतो अभिहारो, सो अभिक्कमो, पच्छतो अपहरणं पटिक्कमोति दस्सेन्तो ‘‘**ठानेपी**’’तिआदिमाह। **आसनस्सा**ति पीठकादिआसनस्स। **पुरिमअङ्गाभिमुखो**ति अटनिकादिपुरिमावयवाभिमुखो। **संसरन्तो**ति संसप्पन्तो। **पच्चासंसरन्तो**ति पटिआसप्पन्तो। **एसेव नयो**ति इमिना सरीरस्सेव अभिमुखसंसप्पनपटिआसप्पनानि निदस्सेति।

सम्मा पजाननं **सम्पजानं**। तेन अत्तना कातब्बकिच्चस्स करणसीलो सम्पजानकारीति आह – ‘‘**सम्पजञ्ञेन सब्बकिच्चकारी**’’ति। सम्पजानमेव हि सम्पजञ्ञं। **सम्पजञ्ञस्सेव वा कारी**ति सम्पजञ्ञस्सेव करणसीलो। **सम्पजञ्ञं करोतेवा**ति अभिक्कन्तादीसु असम्मोहं उप्पादेति एव, सम्पजानस्सेव वा कारो एतस्स अत्थीति **सम्पजानकारी**।

धम्मतो वड्ढितसङ्खातेन सह अत्थेन वत्ततीति सात्थकं, अभिक्कन्तादि, सात्थकस्स सम्पजाननं **सात्थकसम्पजञ्ञं**। सप्पायस्स अत्तनो उपकारावहस्स हितस्स सम्पजाननं **सप्पायसम्पजञ्ञं**। अभिक्कमादीसु भिक्खाचारगोचरे, अञ्ञत्थापि च पवत्तेसु अविजहिते कम्मट्ठानसङ्खाते गोचरे सम्पजञ्ञं **गोचरसम्पजञ्ञं**। अभिक्कमादीसु असम्मुय्हनमेव सम्पजञ्ञं **असम्मोहसम्पजञ्ञं। परिग्गण्हित्वा**ति तुलयित्वा तीरेत्वा, पटिसङ्खायाति अत्थो। **सङ्घदस्सनेनेव** उपोसथपवारणादिअत्थं गमनं सङ्गहितं। **असुभदस्सनादी**ति **आदि**-सद्देन कसिणपरिकम्मादीनं सङ्गहो दट्ठब्बो। सङ्खेपतो वुत्तमत्थं विवरितुं ‘‘**चेतियं दिस्वापि ही**’’तिआदि वुत्तं। **अरहत्तं पापुणाती**ति उक्कट्ठनिद्देसो एसो। समथविपस्सनुप्पादनम्पि हि भिक्खुनो वुद्धि एव। **दक्खिणद्वारे**ति चेतियङ्गणस्स दक्खिणद्वारे, तथा **पच्छिमद्वारे**तिआदीसु। **अभयवापि पाळिय**न्ति अभयवापिया पुरत्थिमतीरे।

बुद्धवंस-अरियवंस-चेतियवंस-दीपवंसादिवंसकथनतो **महाअरियवंसभाणको** थेरो। **पञ्ञायनट्ठाने**ति चेतियस्स पञ्ञायनट्ठाने। **एकपदुद्धारे**ति पदुद्धारपतिट्ठानपरिवत्तनं अकत्वा एकस्मिंयेव अवट्ठाने। **केची**ति अभयगिरिवासिनो।

तस्मिं पनाति सात्थकसम्पजञ्ञवसेन परिग्गहितअत्थेपि गमने। अत्थो नाम धम्मतो वड्ढीति यं सात्थकन्ति अधिप्पेतं गमनं, तं सप्पायमेवाति सिया कस्सचि आसङ्काति तन्निवत्तनत्थं ‘‘**चेतियदस्सनं तावा**’’तिआदि आरद्धं। **चित्तकम्मरूपकानि विया**ति चित्तकम्मकता पटिमायो विय, यन्तपयोगेन वा विचित्तकम्मा पटिमाय सदिसा यन्तरूपका विय। **असमपेक्खनं** गेहस्सितअञ्ञाणुपेक्खावसेन आरम्मणे अयोनिसो ओलोकनादि। यं सन्धाय वुत्तं ‘‘**चक्खुना रूपं दिस्वा उप्पज्जति उपेक्खा बालस्स मूळ्हस्स पुथुज्जनस्सा**’’तिआदि (म॰ नि॰ ३.३०८)। हत्थिआदिसम्मद्देन **जीवितन्तरायो**। विसभागरूपदस्सनादिना **ब्रह्मचरियन्तरायो**।

पब्बजितदिवसतो पट्ठाय भिक्खूनं अनुवत्तनकथा आचिण्णा, अननुवत्तनकथा पन तस्सा अपरा दुतिया नाम होतीति आह – ‘‘**द्वे कथा नाम न कथितपुब्बा**’’ति। **एव**न्ति इमिना ‘‘सचे पना’’तिआदिकं सब्बम्पि वुत्ताकारं पच्चामसति, न ‘‘पुरिसस्स मातुगामासुभ’’न्तिआदिकं वुच्चमानं।

योगकम्मस्स पवत्तिट्ठानताय भावनाय आरम्मणं कम्मट्ठानं वुच्चतीति आह ‘‘**कम्मट्ठानसङ्खातं गोचर**’’न्ति।

उग्गहेत्वाति यथा उग्गहनिमित्तं उप्पज्जति, एवं उग्गहकोसल्लस्स सम्पादनवसेन उग्गहेत्वा।

हरतीति कम्मट्ठानं पवत्तेति, याव पिण्डपातपटिक्कमा अनुयुञ्जतीति अत्थो। **न पच्चाहरती**ति आहारूपभोगतो याव दिवाट्ठानुपसङ्कमना कम्मट्ठानं न पटिनेति। **समादाय वत्तति** सम्मा आदियित्वा तेसं वत्तानं परिपूरणवसेन वत्तति। **सरीरपरिकम्म**न्ति मुखधोवनादिसरीरपटिजग्गनं। **द्वे तयो पल्लङ्के**ति द्वे तयो निसज्जावारे द्वे तीणि उण्हासनानि। तेनाह – **''उसुमं गाहापेन्तो''**ति। **कम्मट्ठानसीसेनेवा**ति कम्मट्ठानमुखेनेव कम्मट्ठानं अविजहन्तो एव। तेन ''पत्तोपि अचेतनो''तिआदिना पवत्तेतब्बकम्मट्ठानं, यथापरिहरियमानं वा कम्मट्ठानं अविजहित्वाति दस्सेति। **तथेवा**ति तिक्खत्तुमेव। परिभोगचेतियतो सरीरचेतियं गरुतरन्ति कत्वा **''चेतियं वन्दित्वा''**ति चेतियवन्दनाय पठमं करणीयता वुत्ता। तथा हि अट्ठकथायं – ''चेतियं बाधयमाना बोधिसाखा हरितब्बा''ति वुत्ता। बुद्धगुणानुस्सरणवसेनेव बोधिञ्च पणिपातकरणन्ति आह – **''बुद्धस्स भगवतो सम्मुखा विय निपच्चकारं दस्सेत्वा''**ति। **गामसमीपे**ति गामस्स उपचारट्ठाने।

जनसङ्गहणत्थन्ति ''मयि अकथेन्ते एतेसं को कथेस्सती''ति धम्मानुग्गहेन जनसङ्गहणत्थं। **तस्मा**ति यस्मा ''धम्मकथा नाम कथेतब्बा एवा''ति अट्ठकथाचरिया वदन्ति, यस्मा च धम्मकथा कम्मट्ठानविनिमुत्ता नाम नत्थि, तस्मा। **कम्मट्ठानसीसेनेवा**ति अत्तना परिहरियमानं कम्मट्ठानं अविजहन्तो तदनुगुणंयेव धम्मकथं कथेत्वा। **अनुमोदनं कत्वा**ति एत्थापि ''कम्मट्ठानसीसेनेवा''ति आनेत्वा सम्बन्धितब्बं। **सम्पत्तपरिच्छेदेनेवा**ति परिचितो अपरिचितोतिआदिविभागं अकत्वा सम्पत्तकोटिया एव, समागममत्तेनेवाति अत्थो। **भये**ति परचक्कादिभये।

कम्मजतेजोति गहणिं सन्धायाह। **कम्मट्ठानवीथिं नारोहति** खुदापरिस्समेन किलन्तकायत्ता समाधानाभावतो। **अवसेसट्ठाने**ति यागुया अग्गहितट्ठाने। **पोङ्खानुपोङ्ख**न्ति कम्मट्ठानुपट्ठानस्स अविच्छेद-दस्सनमेतं, यथा पोङ्खानुपोङ्खं पवत्ताय सरपटिपाटिया अनविच्छेदो, एवमेतस्सपि कम्मट्ठानुपट्ठानस्साति वुत्तं होति।

निक्खित्तधुरो भावनानुयोगे। वत्तपटिपत्तिया अपूरणेन **सब्बवत्तानि भिन्दित्वा**। कामे अवीतरागो होति। काये अवीतरागो। रूपे अवीतरागो। यावदत्थं उदरावदेहं भुञ्जित्वा सेय्यसुखं पस्ससुखं मिद्धसुखं अनुयुत्तो विहरति। अञ्ञतरं देवनिकायं पणिधाय ब्रह्मचरियं चरती''ति (दी॰ नि॰ ३.३२०; म॰ नि॰ १.१८६) एवं वुत्तं **पञ्चविधचेतोविनिबन्धचित्तो। चरित्वा**ति पवत्तित्वा।

गतपच्चागतिकवत्तवसेनाति भावनासहितंयेव भिक्खाय गतपच्चागतं गमनपच्चागमनं एतस्स अत्थीति गतपच्चागतिकं, तदेव वत्तं, तस्स वसेन। अत्तनो हितसुखं कामेन्ति इच्छन्तीति **अत्तकामा,** धम्मच्छन्दवन्तो। ''धम्मो''ति हि हितं तंनिमित्तकञ्च सुखन्ति। अथ वा विञ्ञूनं धम्मानं अत्तनियत्ता अत्तभावपरिच्छिन्नत्ता च अत्ता नाम धम्मो। तेनाह भगवा – **''अत्तदीपा, भिक्खवे, विहरथ अत्तसरणा''**तिआदि (सं॰ नि॰ ३.४३)। तं कामेन्ति इच्छन्तीति **अत्तकामा। उसभं** नाम वीसति यट्ठियो। **ताय सञ्ञाया**ति ताय पासाणसञ्ञाय, ''एत्तकं ठानमागता''ति जानन्ताति अधिप्पायो। **सो एव नयो** अयं भिक्खूतिआदिको यो ठाने वुत्तो, सो एव निसज्जायपि नयो। पच्छतो आगच्छन्तानं छिन्नभत्तभावभयेनपि योनिसोमनसिकारं परिब्रूहेति।

मद्दन्ताति धञ्ञकरणट्ठाने सालिसीसानि मद्दन्ता। **महापधानं पूजेस्सामी**ति अम्हाकं अत्थाय लोकनाथेन छ वस्सानि कतं दुक्करचरियं एवाहं यथासत्ति पूजेस्सामीति। पटिपत्तिपूजा हि सत्थुपूजा, न आमिसपूजाति। **ठानचङ्कममेवा**ति अधिट्ठातब्बइरियापथकालवसेन वुत्तं, न भोजनादिकालेसु अवस्सं कातब्बनिसज्जाय पटिक्खेपवसेन।

वीथिं ओतरित्वा इतो चितो अनोलोकेत्वा पठममेव वीथियो सल्लक्खेतब्बाति आह **''वीथियो सल्लक्खेत्वा''**ति। यं सन्धाय वुच्चति – ''पासादिकेन अभिक्कन्तेना''तिआदि। तं दस्सेतुं **''तत्थ चा''**तिआदि वुत्तं। **आहारे पटिकूलसञ्ञं उपट्ठपेत्वा**तिआदीसु यं वत्तब्बं, तं हेट्ठा वुत्तमेव। **अट्ठङ्गसमन्नागत**न्ति ''यावदेव इमस्स कायस्स ठितिया''तिआदिना (म॰ नि॰ १.२३; २.२४; ३.७५; सं॰ नि॰ ४.१२०; अ॰ नि॰ ६.५८; ८.९) वुत्तेहि अट्ठहि अङ्गेहि समन्नागतं कत्वा। **नेव दवाया**तिआदि पन पटिक्खेपदस्सनं।

पच्चेकबोधिं सच्छिकरोति, यदि उपनिस्सयसम्पन्नो होतीति सम्बन्धो। इदञ्च यथा हेट्ठा तीसु ठानेसु, एवं इतो परेसु ठानेसु उपनेत्वा सम्बन्धितब्बं। तत्थ पच्चेकबोधिया उपनिस्सयसम्पदा कप्पानं द्वे असङ्ख्येय्यानि सतसहस्सञ्च तज्जं पुञ्ञञाणसम्भारसम्भरणं, सावकबोधियं अग्गसावकानं एकं असङ्ख्येय्यं कप्पसतसहस्सञ्च, महासावकानं कप्पसतसहस्समेव तज्जं सम्भारसम्भरणं, इतरेसं अतीतासु जातीसु विवट्टसन्निस्सयवसेन निब्बत्तितं निब्बेधभागियं कुसलं। **बाहियो दारुचीरियो**ति बाहियविसये जातसंवद्धताय बाहियो, दारुचीरपरिहरणेन दारुचीरियोति लद्धसमञ्ञो। सो हि आयस्मा ''तस्मातिह ते, बाहिय, एवं सिक्खितब्बं – दिट्ठे दिट्ठमत्तं भविस्सती''तिआदिवसप्पवत्तेन (उदा॰ १०) संखित्तेनेव ओवादेन खिप्पतरं विसेसं अधिगच्छि। तेन वुत्तं **''खिप्पाभिञ्ञो वा होति सेय्यथापि थेरो बाहियो दारुचीरियो''**ति। एवं **महापञ्ञो वा**तिआदीसु यथारहं वत्तब्बन्ति।

तन्ति असम्मुय्हनं। **एव**न्ति इदानि वुच्चमानाकारदस्सनं। **अत्ता अभिक्कमती**ति इमिना अन्धपुथुज्जनस्स दिट्ठिग्गाहवसेन अभिक्कमे सम्मुय्हनं दस्सेति, **अहं अभिक्कमामी**ति पन इमिना मानग्गाहवसेन, तदुभयं पन तण्हाय विना न होतीति तण्हाग्गाहवसेनपि सम्मुय्हनं दस्सितमेव होति, **''तथा असम्मुय्हन्तो''**ति वत्वा तं असम्मुय्हनं येन घनविनिब्भोगेन होति, तं दस्सेन्तो **''अभिक्कमामीति चित्ते उप्पज्जमाने''**तिआदिमाह। तत्थ यस्मा वायोधातुया अनुगता तेजोधातु उद्धरणस्स पच्चयो। उद्धरणगतिका हि तेजोधातूति उद्धरणे वायोधातुया तस्सा अनुगतभावो, तस्मा इमासं द्विन्नमेत्थ धातूनं सामत्थियतो अधिमत्तता, इतरासञ्च ओमत्तताति दस्सेन्तो **''एकेकपादुद्धरणे...पे॰... बलवतियो''**ति आह। यस्मा पन तेजोधातुया अनुगता वायोधातु अतिहरणवीतिहरणानं पच्चयो। तिरियगतिकाय हि वायोधातुया अतिहरणवीतिहरणेसु सातिसयो ब्यापारोति तेजोधातुया तस्सानुगतभावो, तस्मा इमासं द्विन्नमेत्थ सामत्थियतो अधिमत्तता, इतरासञ्च ओमत्तताति दस्सेन्तो **''तथा अतिहरणवीतिहरणेसू''**ति आह। सतिपि अनुगमनानुगन्तब्बताविसेसे तेजोधातुवायोधातुभावमत्तं सन्धाय **तथा**-सद्दग्गहणं।

तत्थ अक्कन्तट्ठानतो पादस्स उक्खिपनं **उद्धरणं,** ठितट्ठानं अतिक्कमित्वा पुरतो हरणं **अतिहरणं**। रुक्खखाणुआदिपरिहरणत्थं, पतिट्ठितपादघट्टनपरिहरणत्थं वा पस्सेन हरणं **वीतिहरणं**। याव पतिट्ठितपादो, ताव आहरणं **अतिहरणं,** ततो परं हरणं **वीतिहरण**न्ति अयं वा एतेसं विसेसो। यस्मा पथवीधातुया अनुगता आपोधातु वोस्सज्जनस्स पच्चयो। गरुतरसभावा हि आपोधातूति वोस्सज्जने पथवीधातुया तस्सानुगतभावो, तस्मा तासं द्विन्नमेत्थ सामत्थियतो अधिमत्तता, इतरासञ्च ओमत्तताति दस्सेन्तो आह **''वोस्सज्जने...पे॰... बलवतियो''**ति। यस्मा पन आपोधातुया अनुगता पथवीधातु सन्निक्खेपनस्स पच्चयो। पतिट्ठाभावे विय पतिट्ठापनेपि तस्सा सातिसयकिच्चत्ता आपोधातुया तस्सा अनुगतभावो, तथा घट्टनकिरियाय पथवीधातुया वसेन सन्निरुम्भनस्स सिज्झनतो तत्थापि पथवीधातुया आपोधातुअनुगतभावो, तस्मा वुत्तं – **''तथा सन्निक्खेपनसन्निरुम्भनेसू''**ति।

तत्थाति तस्मिं अभिक्कमने, तेसु वा वुत्तेसु उद्धरणादीसु छसु कोट्ठासेसु। **उद्धरणे**ति उद्धरणक्खणे।

रूपारूपधम्माति उद्धरणाकारेन पवत्ता रूपधम्मा तंसमुट्ठापका अरूपधम्मा च। **अतिहरणं न पापुणन्ति** खणमत्तावट्ठानतो। **तत्थ तत्थेवा**ति यत्थ यत्थ उप्पन्ना, तत्थ तत्थेव। न हि धम्मानं देसन्तरसङ्कमनं अत्थि। **पब्बं पब्ब**न्तिआदि उद्धरणादिकोट्ठासे सन्धाय सभागसन्ततिवसेन वुत्तन्ति वेदितब्बं। अतिइत्तरो हि रूपधम्मानम्पि पवत्तिक्खणो, गमनस्सादानं देवपुत्तानं हेट्ठुपरियायेन पटिमुखं धावन्तानं सिरसि पादे च बद्धखुरधारासमागमतोपि सीघतरो। यथा तिलानं भज्जियमानानं तटतटायनेन भेदो लक्खीयति, एवं सङ्खतधम्मानं उप्पादेनाति दस्सनत्थं ''**तटतटायन्ता**''ति वुत्तं। उप्पन्ना हि एकन्ततो भिज्जन्तीति।

सद्धिं रूपेनाति इदं तस्स तस्स चित्तस्स निरोधेन सद्धिं निरुज्झनकरूपधम्मवसेन वुत्तं, यं ततो सत्तरसमचित्तस्स उप्पादक्खणे उप्पन्नं। अञ्ञथा यदि रूपारूपधम्मा समानक्खणा सियुं, ''रूपं गरुपरिणामं दन्धनिरोध''न्तिआदिवचनेहि विरोधो सिया। तथा – ''नाहं, भिक्खवे, अञ्ञं एकधम्मम्पि समनुपस्सामि, यं एवं लहुपरिवत्तं, यथयिदं चित्त''न्ति (अ० नि० १.४८) एवमादिपाळिया च। चित्तचेतसिका हि सारम्मणसभावा यथाबलं अत्तनो आरम्मणपच्चयभूतमत्थं विभावेन्तायेव उप्पज्जन्तीति तेसं तंसभावनिप्फत्तिअनन्तरं निरोधो, रूपधम्मा पन अनारम्मणा पकासेतब्बा। एवं तेसं पकासेतब्बभावनिप्फत्ति सोळसहि चित्तेहि होतीति तङ्गुणायुकता तेसं इच्छिता, लहुकविञ्ञाणस्स विसयसङ्गतिमत्तपच्चयताय तिण्णं खन्धानं, विसयसङ्गतिमत्तताय च विञ्ञाणस्स लहुपरिवत्तिता, दन्धमहाभूतपच्चयताय रूपधम्मानं दन्धपरिवत्तिता। नानाधातुया यथाभूतञाणं खो पन तथागतस्सेव, तेन च पुरेजातपच्चयो रूपधम्मोव वुत्तो, पच्छाजातपच्चयो च तस्सेवाति रूपारूपधम्मानं समानक्खणता न युज्जतेव, तस्मा वुत्तनयेनेवेत्थ अत्थो वेदितब्बो।

अञ्ञं उप्पज्जते चित्तं, अञ्ञं चित्तं निरुज्झतीति यं पुरिमुप्पन्नं चित्तं, तं अञ्ञं, तं पन निरुज्झन्तं अपरस्स अनन्तरादिपच्चयो हुत्वा एव निरुज्झतीति तथालद्धपच्चयं अञ्ञं उप्पज्जते चित्तं। यदि एवं तेसं अन्तरो लब्भेय्याति, नोति आह ''**अवीचिमनुपबन्धो**''ति। यथा वीचि अन्तरो न लब्भति, ''तदेवेत''न्ति अविसेसविदू मञ्ञन्ति, एवं अनु अनु पबन्धो चित्तसन्तानो रूपसन्तानो च **नदीसोतोव** नदियं उदकप्पवाहो विय **वत्तति**।

अभिमुखं लोकितं **आलोकित**न्ति आह ''**पुरतोपेक्खन**''न्ति। यस्मा यंदिसाभिमुखो गच्छति तिट्ठति निसीदति वा, तदभिमुखं पेक्खनं आलोकितं, तस्मा तदनुगतं विदिसालोकनं विलोकितन्ति आह ''**विलोकितं नाम अनुदिसापेक्खन**''न्ति। सम्मज्जनपरिभण्डादिकरणे ओलोकितस्स, उल्लोकाहरणादीसु उल्लोकितस्स, पच्छतो आगच्छन्तस्स परिस्सयस्स परिवज्जनादिवसेन अपलोकितस्स च सिया सम्भवोति आह – ''**इमिना वा मुखेन सब्बानिपि तानि गहितानेवा**''ति।

कायसक्खिन्ति कायेन सच्छिकतवन्तं, पच्चक्खकारिनन्ति अत्थो। सोहायस्मा विपस्सनाकाले एव ''यमेवाहं इन्द्रियेसु अगुत्तद्वारतं निस्साय सासने अनभिरतिआदिविप्पकारं पत्तो, तमेव सुट्ठु निग्गहेस्सामी''ति उस्साहजातो बलवहिरोत्तप्पो, तत्थ च कताधिकारत्ता इन्द्रियसंवरे उक्कंसपारमिप्पत्तो, तेनेव नं सत्था – ''एतदग्गं, भिक्खवे, मम सावकानं भिक्खूनं इन्द्रियेसु गुत्तद्वारानं यदिदं नन्दो''ति (अ० नि० १.२३०) एतदग्गे ठपेसि।

सात्थकता च सप्पायता च वेदितब्बा आलोकितविलोकितस्साति आनेत्वा सम्बन्धो। **तस्मा**ति कम्मट्ठानाविजहनस्सेव गोचरसम्पजञ्ञभावतोति वुत्तमेवत्थं हेतुभावेन पच्चामसति। **अत्तनो कम्मट्ठानवसेनेव आलोकनविलोकनं कातब्बं,** खन्धादिकम्मट्ठानिकेहि अञ्ञो उपायो न गवेसितब्बोति अधिप्पायो। यस्मा आलोकितादिसमञ्ञापि धम्ममत्तस्सेव पवत्तिविसेसो, तस्मा तस्स याथावतो पजाननं असम्मोहसम्पजञ्ञन्ति दस्सेतुं

‘‘**अब्भन्तरे**’’तिआदि वुत्तं। **चित्तकिरियवायोधातुविप्फारवसेना**ति किरियमयचित्तसमुट्ठानवायोधातुया चलनाकारपवत्तिवसेन। **अधो सीदती**ति थोकं ओतरति। **उद्धं लङ्घेती**ति लङ्घन्तं विय उपरि गच्छति।

अङ्गकिच्चं साधयमानन्ति पधानभूतं अङ्गकिच्चं निप्फादेन्तं, उपपत्तिभवस्स सरीरं हुत्वाति अत्थो। **पठमजवनेपि... पे०... सत्तमजवनेपि न होती**ति इदं पञ्चद्वारविञ्ञाणवीथियं ‘‘इत्थी पुरिसो’’ति रज्जनादीनं अभावं सन्धाय वुत्तं। तत्थ हि आवज्जनवोट्ठब्बनानं अयोनिसो आवज्जनवोट्ठब्बनवसेन इट्ठे इत्थिरूपादिम्हि लोभमत्तं, अनिट्ठे पटिघमत्तं उप्पज्जति। मनोद्वारे पन ‘‘इत्थी पुरिसो’’ति रज्जनादि होति, तस्स पञ्चद्वारजवनं मूलं, यथावुत्तं वा सब्बं भवङ्गादि। एवं मनोद्वारजवनस्स मूलभूतधम्मपरिजाननवसेनेव मूलपरिञ्ञा वुत्ता, आगन्तुकतावकालिकता पन पञ्चद्वारजवनस्सेव अपुब्बभाववसेन चेव इत्तरभाववसेन च वुत्ता। **हेट्ठुपरियवसेन भिज्जित्वा पतितेसू**ति हेट्ठिमस्स उपरिमस्स च अपरापरं भङ्गुप्पत्तिमाह।

तन्ति जवनं। तस्स जवनस्स न युत्तन्ति सम्बन्धो। **आगन्तुको** अब्भागतो। उदयब्बयपरिच्छिन्नो तावतको कालो एतेसन्ति **तावकालिकानि**।

एतं असम्मोहसम्पजञ्ञं। **समवाये**ति सामग्गियं। **तत्था**ति पञ्चक्खन्धवसेन आलोकनविलोकने पञ्ञायमाने तब्बिनिमुत्तो – **को एको आलोकेति, को विलोकेति। उपनिस्सयपच्चयो**ति इदं सुत्तन्तनयेन परियायतो वुत्तं। **सहजातपच्चयो**ति निदस्सनमत्तमेतं अञ्ञमञ्ञसम्पयुत्तअत्थिअविगतादिपच्चयानम्पि लब्भनतो।

कालेति समिञ्जितुं युत्तकाले **समिञ्जन्तस्स,** तथा पसारेतुं युत्तकाले **पसारेन्तस्स। ‘‘मणिसप्पो** नाम एका सप्पजाती’’ति वदन्ति। **लळन**न्ति कम्पनं, लीळाकरणं वा।

उण्हपकतिको परिळाहबहुलकायो। सीलस्स विदूसनेन अहितावहत्ता **मिच्छाजीववसेन उप्पन्नं असप्पायं। ‘‘चीवरम्पि अचेतन**’’न्तिआदिना चीवरस्स विय कायोपि अचेतनोति कायस्स अत्तसुञ्ञताविभावनेन ‘‘**अब्भन्तरे**’’तिआदिना वुत्तमेवत्थं परिदीपेन्तो इतरीतरसन्तोसस्स कारणं दस्सेति। तेनाह ‘‘**तस्मा**’’तिआदि।

चतुपञ्चगण्ठिकाहतोति आहतचतुपञ्चगण्ठिको, चतुपञ्चगण्ठिकाहि वा हतसोभो।

अट्ठविधोपि अत्थोति अट्ठविधोपि पयोजनविसेसो। महासिवत्थेरवादवसेन ‘‘इमस्स कायस्स ठितिया’’तिआदिना नयेन वुत्तो दट्ठब्बो। इमस्मिं पक्खे ‘‘**नेव दवायातिआदिना नयेना**’’ति पन इदं पटिक्खेपङ्गदस्सनमुखेन पाळि आगताति कत्वा वुत्तन्ति दट्ठब्बं।

पथवीसन्धारकजलस्स तंसन्धारकवायुना विय परिभुत्तस्स आहारस्स वायोधातुयाव आसये अवट्ठानन्ति आह – ‘‘**वायोधातुवसेनेव तिट्ठती**’’ति। **अतिहरती**ति याव मुखा अभिहरति। **वीतिहरती**ति ततो कुच्छियं विमिस्सं करोन्तो हरति। **अतिहरती**ति वा मुखद्वारं अतिक्कामेन्तो हरति। **वीतिहरती**ति कुच्छिगतं पस्सतो हरति। **परिवत्तेती**ति अपरापरं चारेति। एत्थ च आहारस्स धारणपरिवत्तनसञ्चुण्णनविसोसनानि पथवीधातुसहिता एव वायोधातु करोति, न केवलाति तानि पथवीधातुया किच्चभावेन वुत्तानि, सा एव धारणादीनि किच्चानि करोन्तस्स साधारणाति वुत्तानि। **अल्लत्तञ्च अनुपालेती**ति यथा वायोधातुआदीहि अञ्ञेहि विसोसनं न होति, तथा अनुपालेति अल्लभावं। **तेजोधातू**ति गहणीसङ्खाता

तेजोधातु। सा हि अन्तोपविट्ठं आहारं परिपाचेति। **अञ्जसो होती**ति आहारस्स पविसनादीनं मग्गो होति। **आभुजती**ति परियेसनवसेन, अज्झोहरणजिण्णाजिण्णतादिपटिसंवेदनवसेन च आवज्जेति, विजानातीति अत्थो। तंतंविजाननस्स पच्चयभूतोयेव हि पयोगो ''सम्मापयोगो''ति वुत्तो। येन हि पयोगेन परियेसनादि निप्फज्जति, सो तब्बिसयविजाननम्पि निप्फादेति नाम तदविनाभावतो। अथ वा सम्मापयोगं सम्मापटिपत्तिं **अन्वाय** आगम्म **आभुजति** समन्नाहरति। आभोगपुब्बको हि सब्बोपि विञ्ञाणब्यापारोति तथा वुत्तं।

गमनतोति भिक्खाचारवसेन गोचरगामं उद्दिस्स गमनतो। **परियेसनतो**ति गोचरगामे भिक्खत्थं आहिण्डनतो। **परिभोगतो**ति आहारस्स परिभुञ्जनतो। **आसयतो**ति पित्तादिआसयतो। आसयति एत्थ एकज्झं पवत्तमानोपि कम्मबलववत्थितो हुत्वा मरियादवसेन अञ्ञमञ्ञं असङ्करतो सयति तिट्ठति पवत्ततीति **आसयो,** आमासयस्स उपरि तिट्ठनको पित्तादिको। मरियादत्थो हि अयमाकारो। निधेति यथाभुत्तो आहारो निचितो हुत्वा तिट्ठति एत्थाति निधानं, आमासयो, ततो **निधानतो। अपरिपक्कतो**ति गहणीसङ्खातेन कम्मजतेजेन अविपक्कतो। **परिपक्कतो**ति यथाभुत्तस्स आहारस्स विपक्कभावतो। **फलतो**ति निप्फत्तितो। **निस्सन्दतो**ति इतो चितो च विस्सन्दनतो। **सम्मक्खनतो**ति सब्बसो मक्खनतो। अयमेत्थ सङ्खेपो, वित्थारो पन **विसुद्धिमग्गसंवण्णनाय** (विसुद्धि॰ महाटी॰ १.२९४) गहेतब्बो।

सरीरतो सेदा मुच्चन्तीति वेगसन्धारणेन उप्पन्नपरिळाहतो सरीरतो सेदा मुच्चन्ति। **अञ्ञे च रोगा** कण्णसूलभगन्दरादयो। **अट्ठाने**ति मनुस्सामनुस्सपरिग्गहे अयुत्तट्ठाने खेत्तदेवायतनादिके। कुद्धा हि मनुस्सा अमनुस्सापि वा जीवितक्खयं पापेन्ति। विस्सट्ठत्ता **नेव तस्स भिक्खुनो अत्तनो,** कस्सचि अनिस्सज्जितत्ता जिगुच्छनीयत्ता च **न परस्स, उदकतुम्बतो**ति वेळुनाळिआदिउदकभाजनतो। **त**न्ति छड्डितउदकं।

एत्थ च एको इरियापथो द्वीसु ठानेसु आगतो, सो पुब्बे अभिक्कमपटिक्कमगहणेन। ''गमनेपि पुरतो पच्छतो च कायस्स अभिहरणं वुत्तन्ति इध गमनमेव गहित''न्ति अपरे। यस्मा इध सम्पजञ्ञकथायं असम्मोहसम्पजञ्ञमेव धुरं, तस्मा अन्तरन्तरे इरियापथे पवत्तानं रूपारूपधम्मानं तत्थ तत्थेव निरोधदस्सनवसेन सम्पजानकारिता गहिताति। मज्झिमभाणका पन एवं वदन्ति – एको हि भिक्खु गच्छन्तो अञ्ञं चिन्तेन्तो, अञ्ञं वितक्केन्तो गच्छति, एको कम्मट्ठानं अविस्सज्जेत्वाव गच्छति, तथा एको तिट्ठन्तो, निसीदन्तो, सयन्तो अञ्ञं चिन्तेन्तो, अञ्ञं वितक्केन्तो सयति, एको कम्मट्ठानं अविस्सज्जेत्वाव सयति। एत्तकेन पन न पाकटं होतीति चङ्कमनेन दीपेन्ति। यो भिक्खु चङ्कमनं ओतरित्वा चङ्कमनकोटियं ठितो परिग्गण्हाति – ''पाचीनचङ्कमनकोटियं पवत्ता रूपारूपधम्मा पच्छिमचङ्कमनकोटिं अप्पत्वा एत्थेव निरुद्धा, पच्छिमचङ्कमनकोटियं पवत्तापि पाचीनचङ्कमनकोटिं अप्पत्वा एत्थेव निरुद्धा, चङ्कमनमज्झे पवत्ता उभो कोटियो अप्पत्वा एत्थेव निरुद्धा, चङ्कमने पवत्ता रूपारूपधम्मा ठानं अप्पत्वा एत्थेव निरुद्धा, ठाने पवत्ता निसज्जं अप्पत्वा एत्थेव निरुद्धा, निसज्जाय पवत्ता सयनं अप्पत्वा एत्थेव निरुद्धा''ति, एवं परिग्गण्हन्तो परिग्गण्हन्तो एव चित्तं भवङ्गं ओतारेति, उट्ठहन्तो पन कम्मट्ठानं गहेत्वाव उट्ठहति। अयं भिक्खु **गतादीसु सम्पजानकारी** नाम होतीति।

एवम्पि सुत्ते कम्मट्ठानं अविभूतं होति, कम्मट्ठानं अविभूतं न कातब्बं, तस्मा सो भिक्खु याव सक्कोति, ताव चङ्कमित्वा ठत्वा निसीदित्वा सयमानो एवं परिग्गहेत्वा सयति – ''कायो अचेतनो मञ्चो अचेतनो, कायो न जानाति 'अहं मञ्चे सयितो'ति, मञ्चोपि न जानाति 'मयि कायो सयितो'ति, अचेतनो कायो अचेतने मञ्चे सयितो''ति, एवं परिग्गण्हन्तो एव चित्तं भवङ्गं ओतारेति, पबुज्झन्तो कम्मट्ठानं गहेत्वाव पबुज्झतीति अयं **सुत्ते सम्पजानकारी** नाम होति। कायिकादिकिरियानिब्बत्तनेन तम्मयत्ता आवज्जनकिरियानिब्बत्तकत्ता आवज्जनकिरियासमुट्ठितत्ता च जवनं, सब्बम्पि वा

छद्वारप्पवत्तं किरियामयपवत्तं नाम, तस्मिं सति जागरितं नाम होतीति परिग्गण्हन्तो **जागरिते सम्पजानकारी** नाम। अपिच रत्तिन्दिवं छ कोट्ठासे कत्वा पञ्च कोट्ठासे जग्गन्तोपि **जागरिते सम्पजानकारी** नाम होतीति।

विमुत्तायतनसीसे ठत्वा धम्मं देसेन्तोपि बात्तिंसतिरच्छानकथं पहाय दसकथावत्थुनिस्सितसप्पायकथं कथेन्तोपि **भासिते सम्पजानकारी** नाम होति। अट्ठतिंसाय आरम्मणेसु चित्तरुचियं आरम्मणं मनसिकारं पवत्तेन्तोपि दुतियज्झानं समापन्नोपि **तुण्हीभावे सम्पजानकारी** नाम। दुतियञ्हि झानं वचीसङ्खारप्पहानतो विसेसतो तुण्हीभावो नामाति। **ओट्ठे चा**तिआदीसु **च**-सद्देन कण्ठसीसनाभिआदीनं सङ्गहो दट्ठब्बो। **तदनुरूपं पयोग**न्ति तस्स उप्पत्तिया अनुच्छविकं चित्तस्स पवत्तिआकारसञ्ञितं पयोगं, यतो सब्बे विचारादयो निप्फज्जन्ति। **उपादारूपपवत्तिया**ति विञ्ञत्तिविकारसहितसद्दायतनुप्पत्तिया। **एव**न्ति वुत्तप्पकारेन। सत्तसुपि ठानेसु असम्मुय्हनवसेन "**मिस्सक**"न्ति वुत्तं। मग्गसम्मासतियापि कायानुपस्सनादिअनुरूपत्ता सम्पजञ्ञानुरूप**पुब्बभागं** सत्तट्ठानियस्स एकन्तलोकियत्ता।

सतिसुत्तवण्णना निट्ठिता।

३. भिक्खुसुत्तवण्णना

३६९. यस्मा सो भिक्खु "देसेतु मे, भन्ते, भगवा संखित्तेन धम्म"न्ति संखित्तेन धम्मदेसनं याचि, तस्स संखित्तरुचिभावतो, तस्मा संखित्तेनेव धम्मं देसेतुकामो भगवा "तस्मातिहा"तिआदिमाहाति वुत्तं – "**यस्मा संखित्तेन देसनं याचसि, तस्मा**"ति। कम्मस्सकतादिट्ठिकस्सेव लोकियलोकुत्तरगुणविसेसा इज्झन्ति, न दिट्ठिविपन्नस्स, तस्मा वुत्तं "**दिट्ठीति कम्मस्सकतादिट्ठी**"ति।

४. सालसुत्तवण्णना

३७०. यथानुसिट्ठं पटिपज्जमाने अपायदुक्खे अपातनवसेन धारणट्ठेन **धम्मो,** सासनब्रह्मचरियं, तदेव तदङ्गादिवसेन किलेसानं विनयनट्ठेन **विनयो**ति आह – "**धम्मोति वा...पे०... नाम**"न्ति। पटिपक्खधम्मेहि अनभिभूतताय एको उदेतीति एकोदीति लद्धनामो समाधि भूतो जातो एतेसन्ति **एकोदिभूता**। एत्थ च **एकोदिभूता**ति एतेन उपचारज्झानावहो पुब्बभागिको समाधि वुत्तो। **समाहिता**ति एतेन उपचारप्पनासमाधि। **एकग्गचित्ता**ति एतेन सुभावितो वसिप्पत्तो अप्पनासमाधि वुत्तोति वेदितब्बो। **नवकभिक्खूहि भावितसतिपट्ठाना पुब्बभागा**। ते हि यथाभूतञाणाय भाविता। यथाभूतञाणन्ति हि सोतापत्तिमग्गञाणं इधाधिप्पेतं। **खीणासवेहि भावितसतिपट्ठानापि पुब्बभागा**। तेसञ्हि कतकरणीयानं दिट्ठधम्मसुखविहाराय सतिपट्ठानभावना, सेक्खानं पन सतिपट्ठानभावना परिञ्ञत्थाय पवत्ता लोकिया, परिजाननवसेन पवत्ता लोकुत्तराति "**मिस्सका**"ति वुत्तं।

५. अकुसलरासिसुत्तवण्णना

३७१. पञ्चमे **केवलो**ति कुसलधम्मेहि असम्मिस्सो, ततो एव सकलो सुक्कपक्खो अनवज्जट्ठो। सेसं वुत्तनयमेव।

६. सकुणग्घिसुत्तवण्णना

३७२. पाकतिकसकुणकुलेसु बलवभावतो तेसं हननतो **सकुणग्घि**। सेनोति वुत्तं "**सेनस्सेतं अधिवचन**"न्ति,

सेनविसेसो पन सो वेदितब्बो। आमिसत्थाय पत्तत्ता **“लोभसाहसेन पत्ता”**ति वुत्तं, लोभनिमित्तेन साहसाकारेन पत्ताति अत्थो। नङ्गलेन कट्ठं कसितं नङ्गलकट्ठं, तं करीयति एत्थाति **नङ्गलकट्ठकरण**न्ति आह – **“अधुना कट्ठं खेत्तट्ठान”**न्ति। लेड्डुयो तिट्ठन्ति एत्थाति **लेड्डुट्ठानं,** लेड्डुनिमित्तं कसितट्ठानं। वज्जतीति वदं, वचनं। कुच्छितं वदं अवदं। गरहने हि अयं अ-कारो यथा – “अपुत्तो अभरिया”ति। अवदं मानेतीति **अवदमाना,** अत्तनो बलमदेन लापं अतिमञ्ञित्वा वदन्तीति अत्थो। तेनेवाह “गच्छ खो, त्वं लाप, तत्रपि मे गन्त्वा न मोक्खसी”ति। यं पन अट्ठकथायं वुत्तं “अत्तनो बलस्स सुट्ठु वण्णं वदमाना”ति, तत्थ अत्ततो आपन्नं गहेत्वा वुत्तं। “वदमानो”ति वा पाठो, सारम्भवसेन अव्हायन्तोति अत्थो। तेनाह “एहि खो दानि सकुणग्घी”ति। **सुट्ठु ठपेत्वा**ति जियामुत्तसरस्स विय सीघपातयोग्यताकरणेन उभो पक्खे सम्मा ठपेत्वा। **अय**न्ति सकुणग्घि। **ञत्वा**ति यथाभूतदस्सनेन अत्तनो ञाणेन जानित्वा। **फालीयित्था**ति फालच्छेदतिखिणसिखरे सुक्खलेड्डुस्मिं भिज्जित्थ।

७. मक्कटसुत्तवण्णना

३७३. सञ्चारोति सञ्चरणं। **लेप**न्ति सिलेससदिसं आलेपनं। **काजसिक्का विया**ति काजदण्डके ओलग्गेतब्बा सिक्का विय। अपिच चतस्सो रज्जुयो उपरि बन्धनट्ठानञ्चाति **पञ्चट्ठानं। ओड्डितो**ति ओलम्बितो। **थुनन्तो**ति नित्थुनन्तो।

८. सूदसुत्तवण्णना

३७४. आहारसम्पादनेन तंतंआहारवत्थुगते सूदेति पग्घरेतीति **सूदो,** भत्तकारको। दहरेहि मनापतरं अच्चेतब्बतो अतिक्कमितब्बतो अच्चया, भोजने रसविसेसा, तस्मा **नानच्चयेही**ति नानप्पकाररसविसेसेहीति अत्थो। तेन वुत्तं “नानच्चयेही”तिआदि। अग्गीयति असङ्करतो विभजीयतीति अग्गो, अम्बिलमेव अग्गो **अम्बिलग्गो**ति आह – **“अम्बिलग्गेहीति अम्बिलकोट्ठासेही”**ति। दातुं अभिहरितब्बताय **अभिहारा,** देय्यधम्मा। तेनाह – **“अभिहटानं दायान”**न्ति। **इदं मे कम्मट्ठानं अनुलोमंवा**ति इदं मम कम्मट्ठानं एवं पवत्तमानं अनुलोमावसानमेव हुत्वा तिट्ठति। एवं पुन पवत्तमानं उस्सक्कित्वा विसेसनिब्बत्तनत्थमेव होतीति एवं **निमित्तं गहेतुं न सक्कोति** बालो अब्यत्तो, पण्डितो पन सक्कोति। **अत्तनो चित्तस्सा**ति अत्तनो भावनाचित्तस्स। **पुब्बभागविपस्सना सतिपट्ठानाव कथिता** “सकस्स चित्तस्स निमित्तं उग्गण्हाती”ति वुत्तत्ता।

९. गिलानसुत्तवण्णना

३७५. पादगामोति नगरस्स पदसदिसो महन्तगामो। तेनेवाह **“वेसालियं विहरति वेळुवगामके”**ति। अहितनिसेधन-हितनियोजन-ब्यसनपरिच्चजन-लक्खणो मित्तभावो येसु अत्थि, ते **मित्ता**। ये पन दिट्ठमत्तसहाया, ते **सन्दिट्ठा**। ये सविसेसं भत्तिमन्तो, ते **सम्भत्ता**ति दस्सेन्तो **“मित्ताति मित्तावा”**तिआदिमाह। **अस्सा**ति भगवतो। पञ्चमियं अट्ठमियं चातुद्दसियं पञ्चदसियन्ति एकेकस्मिं पक्खे चत्तारो वारे कत्वा मासस्स **अट्ठवारे**।

वेदनानं बलवभावेन **खरो फरुसो** कक्खळो। **आबाधो**ति पुब्बकम्महेतुताय कम्मसमुट्ठानो आबाधो सङ्खारदुक्खतासङ्खातो सब्बकालिकत्ता सरीरस्स सभागरोगो नाम। नायमीदिसो आबाधो, अयं पन बहलतरब्याधिताय **“विसभागरोगो”**ति वुत्तो। अन्त-सद्दो समीपपवत्तोति आह – **“मरणन्तं मरणसन्तिक”**न्ति। **वेदना…पे०… अकरोन्तो** उक्कंसगतभावितकायादिताय। **अपीळियमानो**ति अपीळियमानो विय। ओवादमेव भिक्खुसङ्घस्स अपलोकनन्ति आह

— ''**ओवादानुसासनिं अदत्वाति वुत्तं होती**''ति। **पुब्बभागवीरियं** नाम फलसमापत्तिया परिकम्मभूतविपस्सनावीरियं। **जीवितम्पि जीवितसङ्खारो** पतितुं अदत्वा अत्तभावस्स अभिसङ्खरणतो।

''एत्तकं कालं अतिक्कमित्वा वुट्ठहिस्सामी''ति खणपरिच्छेदवती समापत्ति **खणिकसमापत्ति। निग्गुम्बं निज्जटं कत्वा**ति रूपसत्तकारूपसत्तकवसेन पवत्तियमानं विपस्सनाभावनं सब्बसो खिलविरहेन निग्गुम्बं, अब्याकुलताय निज्जटं कत्वा। **महाविपस्सनावसेना**ति पच्चेकं सविसेसं वित्थारितानं अट्ठारसादीनं महाविपस्सनानं वसेन विपस्सित्वा **समापन्ना** या **समापत्ति, सा सुट्ठु विक्खम्भेति** वेदनं महाबलवताय पुब्बारम्मणस्स, महानुभावताय तथापवत्तितविपस्सनावीरियस्स। **यथा नामा**तिआदिना तस्स निदस्सनं दस्सेति। **वेदना**ति दुक्खवेदना। **चुद्दसहाकारेही**ति तस्सेव सत्तकद्वयस्स वसेन वदति। **सन्नेत्वा**ति अन्तरन्तरा समापन्नज्झानसमापत्तिसम्भूतेन विपस्सनापीतिसिनेहेन तेमेत्वा। **समापत्ती**ति फलसमापत्ति।

गिलाना वुट्ठितोति गिलानभावतो वुट्ठितो। सरीरस्स गरुथद्धभावप्पत्ति मधुरकताति आह — ''**सञ्जातगरुभावो सञ्जातथद्धभावो**''ति। **नानाकारतो**ति पुरत्थिमादिभेदतो। **सतिपट्ठानधम्मा**ति पुब्बे अत्तना भावियमाना सतिपट्ठानधम्मा। **पाकटा न होन्ति** कायचित्तानं अकम्मञ्ञताय। **तन्ति धम्मा**ति परियत्तिधम्मा न ञायन्ति।

अनन्तरं अबाहिरन्ति धम्मवसेन पुग्गलवसेन च अन्तरबाहिरं अकत्वा। **एत्तक**न्तिआदिना वुत्तमेवत्थं विवरति। **दहरकाले**ति अत्तनो दहरकाले। **न एवं होती**ति ''अहं भिक्खुसङ्घं परिहरिस्सामी''तिआदिको मानतण्हामूलको इस्सामच्छरियानं पवत्तिआकारो तथागतस्स न होति, नत्थेव पगेव तेसं समुच्छिन्नत्ताति आह — ''**बोधिपल्लङ्केयेवा**''तिआदि। पटिसङ्खरणेन वेठेन मिस्सकेन। **मञ्ञे**ति यथावुत्तं पटिसङ्खरणसञ्ञितेन वेठमिस्सकेन विय जरसकटं। **अरहत्तफलवेठेना**ति अरहत्तफलसमापत्तिसञ्ञितेन अत्थभाववेठेन।

फलसमापत्तिया अधिप्पेतत्ता ''**एकच्चानं वेदनानन्ति लोकियानं वेदनान**''न्ति वुत्तं। **अत्तदीपा**ति एत्थ **अत्त**-सद्देन धम्मो एव वुत्तो, स्वायमत्थो हेट्ठा विभावितो एव। **नवविधो लोकुत्तरधम्मो वेदितब्बो**। सो हि चतूहि ओघेहि अनज्झोत्थरणीयतो ''दीपो''ति वुत्तो। **तमअग्गे**ति तमयोगाभावेन सदेवकस्स लोकस्स अग्गे। **सब्बेस**न्ति सब्बेसं सिक्खाकामानं। **ते** ''धम्मदीपा विहरथा''ति वुत्ता **चतुसतिपट्ठानगोचराव भिक्खू अग्गे भविस्सन्ति।**

१०. भिक्खुनुपस्सयसुत्तवण्णना

३७६. **कम्मट्ठानकम्मिका**ति कम्मट्ठानमनुयुत्ता। विसेसेतीति **विसेसो,** अतिसयो, स्वायं पुब्बापरविसेसो उपादायुपादाय गहेतब्बोति तं दस्सेतुं ''**तत्था**''तिआदिमाह।

उप्पज्जति किलेसपरिळाहोति काये असुभादिवसेन मनसिकारं अदहन्तस्स मनसिकारस्स वीथियं अपटिपन्नता सुभादिवसेन कायारम्मणो किलेसपरिळाहो च उप्पज्जति। वीरियारम्भस्स अभावेन तस्मिं आरम्मणे **चेतसो वा लीनत्तं** होति, गोचरज्झत्ततो **बहिद्धा पुथुत्तारम्मणे चित्तं विक्खिपति। एवं किलेसपरिळाहे चा**तिआदिना तिविधम्पि भावनानुयोगस्स किलेसवत्थुभावं उपादाय समुच्चयवसेन अट्ठकथायं वुत्तं। यस्मा पन ते परिळाहलीनत्तविक्खेपा एकज्झं न पवत्तन्ति, तस्मा पाळियं ''कायारम्मणो वा''तिआदिना अनियमत्थो वा-सद्दो गहितो। **किलेसानुरञ्जितेना**ति किलेसविवण्णितचित्तेन हुत्वा न वत्तितब्बं। कथं पन वत्तितब्बन्ति आह ''**किस्मिञ्चिदेवा**''ति। **न च वितक्केति न च**

विचारेतीति किलेससहगते वितक्कविचारे न पवत्तेति। **सुखितो**ति झानसुखेन सुखितो।

इमस्स भिक्खुनो भावना पवत्ताति सम्बन्धो। यस्मा हि इमस्स भिक्खुनो तं मूलकम्मट्ठानं परिपन्थे सति ठपेत्वा बुद्धगुणादिअनुस्सरणेन चित्तं पसादेत्वा मूलकम्मट्ठानभावना पवत्ता, तस्मा पणिधाय भावनाति वुत्तन्ति सम्बन्धो। **अट्ठपेत्वा**ति चित्तं अप्पवत्तेत्वाति अत्थो वेदितब्बो। कम्मट्ठानादीनं तिण्णम्पि वसेन अत्थयोजना सम्भवति। तेनाह ''**तत्था**''तिआदि। **सारेन्तो विया**ति रथं वाहयन्तो विय। समप्पमाणतो अट्ठकादिवसेन **सुतच्छितं पक्खिपन्तो विय**। सुखेनेव किलेसानं ओकासं अदेन्तो अन्तरा असज्जन्तो **अलग्गन्तो**। विपस्सनाचारस्स आरद्धवुत्तितं अपरिपन्थतञ्च दस्सेन्तो ओपम्मद्वयमाह। **ब्याभङ्गिया**ति काजदण्डेन। **किलेसपरिळाहादीन**न्ति किलेसपरिळाहलीनत्तविक्खेपानं।

गुळखण्डादीनीति गुळखण्डसक्खरखण्डादीनि उच्छुविकारभूतानि। ''काये कायानुपस्सी विहरामी''तिआदिवचनतो ''**पुब्बभागविपस्सना कथिता**''ति वुत्तं।

अम्बपालिवग्गवण्णना निट्ठिता।

२. नालन्दवग्गो

२. नालन्दसुत्तवण्णना

३७८. दुतियवग्गे पठमसुत्तं हेट्ठा वुत्तनयत्ता सुविञ्ञेय्यन्ति तं लङ्घित्वा ''**दुतिये**''ति वुत्तं।

भिय्यतरो अभिञ्ञातोति सम्बोधिया सेट्ठतरोति अभिलक्खितो। **भिय्यतराभिञ्ञो**ति सब्बसत्तेसु अधिकतरपञ्ञो। तेनाह ''**उत्तरितरञाणो**''ति। सम्मा अनवसेसतो बुज्झति एतेनाति **सम्बोधी**ति आह – ''**सम्बोधियन्ति सब्बञ्ञुतञ्ञाणे**''ति। **निप्पदेसा गहिता**ति अनवसेसा बुद्धगुणा गहिता अग्गमग्गसिद्धियाव भगवतो सब्बगुणानं सिद्धत्ता। न केवलञ्च बुद्धानं, अथ खो अग्गसावकपच्चेकबुद्धानम्पि तंतंगुणसमिज्झनं अग्गमग्गाधिगमेनेवाति दस्सेन्तो ''**द्वेपि अग्गसावका**''तिआदिमाह।

अपरो नयो – **पसन्नो**ति इमिना पसादस्स वत्तमानता दीपिताति **उप्पन्नसद्धो**ति इमिनापि सद्धाय पच्चुप्पन्नता पकासिताति आह – ''**एवं सद्दहामीति अत्थो**''ति। अभिजानाति अभिमुखभावेन सब्बञ्ञेय्यं जानातीति अभिञ्ञो, भिय्यो अधिको अभिञ्ञोति **भिय्योभिञ्ञो**। सो एव अतिसयवचनिच्छावसेन भिय्योभिञ्ञतरोति वुत्तोति आह – ''**भिय्यतरो अभिञ्ञातो**''ति। दुतियविकप्पे पन अभिजानातीति अभिञ्ञा, अभिविसिट्ठा पञ्ञा। भिय्यो अभिञ्ञा एतस्साति भिय्योभिञ्ञो, सो एव अतिसयवचनिच्छावसेन **भिय्योभिञ्ञतरो**। स्वायं अस्स अतिसयो अभिञ्ञाय भिय्योभावकतोति आह – ''**भिय्यतराभिञ्ञो वा**''ति। सम्बुज्झति एतायाति **सम्बोधि,** सब्बञ्ञुतञ्ञाणं अग्गमग्गञाणञ्च। सब्बञ्ञुतञ्ञाणपदट्ठानञ्हि अग्गमग्गञाणं, अग्गमग्गञाणपदट्ठानञ्च सब्बञ्ञुतञ्ञाणं **सम्बोधि नाम**। तत्थ पधानवसेन तदत्थदस्सने पठमविकप्पो, पदट्ठानवसेन दुतियविकप्पो। कस्मा पनेत्थ अरहत्तमग्गञाणस्सेव गहणं, ननु हेट्ठिमानिपि भगवतो मग्गञाणानि सवासनमेव यथासकं पटिपक्खविधमनवसेन पवत्तानि। सवासनप्पहानञ्हि ञेय्यावरणप्पहानन्ति? सच्चमेतं, तं पन अपरिपुण्णं पटिपक्खविधमनस्स विप्पकतभावतोति आह ''**अरहत्तमग्गञाणे वा**''ति। **सब्ब**न्ति सम्मासम्बुद्धेन अधिगन्तब्बं सब्बं।

खादनीयानं उळारता सातरसानुभावेनाति आह **''मधुरे आगच्छती''**ति। पसंसाय उळारता विसिट्ठभावेनाति आह – **''सेट्ठे''**ति। ओभासस्स उळारता महन्तभावेनाति वुत्तं – **''विपुले''**ति। उसभस्स अयन्ति आसभी, इध पन आसभी वियाति **आसभी**। तेनाह – **''उसभस्स वाचासदिसी''**ति। येन गुणेन सा तंसदिसा, तं दस्सेतुं **''अचला असम्पवेधी''**ति वुत्तं। यतो कुतोचि अनुस्सवनं **अनुस्सवो**। विज्जाट्ठानादीसु कतपरिचयानं आचरियानं तं तं अत्थं ञापेन्ती पवेणी **आचरियपरम्परा**। केवलं अत्तनो मतिया ''इति किर एवं किरा''ति परिकप्पना **इतिकिरा**। पिटकस्स गन्थस्स सम्पदानतो भूततो तस्स गहणं **पिटकसम्पदानं**। यथासुतानं अत्तानं आकारस्स परिवितक्कनं **आकारपरिवितक्को**। तथेवस्स ''एवमेत''न्ति दिट्ठिया निज्झानक्खमनं **दिट्ठिनिज्झानक्खन्ति**। आगमाधिगमेहि विना केवलं अनुस्सुततो तक्कमग्गं निस्साय तक्कनं **तक्को**। अनुमानविधिं निस्साय गहणं **नयग्गाहो**। यस्मा बुद्धविसये ठत्वा भगवतो अयं थेरस्स चोदना थेरस्स च सो अविसयो, तस्मा **''पच्चक्खतो ञाणेन पटिविज्झित्वा विया''**ति वुत्तं। सीहनादो वियाति **सीहनादो**। तंसदिसता चस्स सेट्ठभावेन, सो चेत्थ एवं वेदितब्बोति दस्सेन्तो **''सीहनादो''**तिआदिमाह। **उन्नादयन्तेना**ति असनिसदिसं करोन्तेन।

अनुयोगदापनत्थन्ति अनुयोगं सोधापेतुं। विमद्दक्खमञ्हि सीहनादं नदन्तो अत्थतो अनुयोगं **सोधेति** नाम, अनुयुञ्जन्तो च नं **सोधापेति** नाम। **दातु**न्ति सोधेतुं। केचि ''दानत्थ''न्ति अत्थं वदन्ति, तं न युत्तं। न हि यो सीहदानं नदति, सो एव तत्थ अनुयोगं देतीति युज्जति। **निघंसन**न्ति विमद्दनं। **धममान**न्ति तापयमानं। तापनञ्चेत्थ गग्गरिया धम्मापनसीसेन वदति।

सब्बे तेति सब्बे ते अतीते निरुद्धे सम्मासम्बुद्धे। तेनेतं दस्सेति – ये ते अहेसुं अतीतमद्धानं तव अभिनीहारतो ओरं सम्मासम्बुद्धा, तेसं ताव सावकञाणगोचरे धम्मे परिच्छिन्दन्तो मारादयो विय च बुद्धानं लोकियचित्ताचारं त्वं जानेय्यासि। ये पन ते अब्भतीता, ततो परतो छिन्नवटुमा छिन्नपपञ्चा परियादिन्नवट्टा सब्बदुक्खवीतिवत्ता सम्मासम्बुद्धा, तेसं सब्बेसम्पि तव सावकञाणस्स अविसयभूते धम्मे कथं जानिस्ससीति। **तेना**ति सम्बोधिसङ्खातेन सब्बञ्ञुतञ्ञाणपदट्ठानेन अरहत्तमग्गञाणेन। **एवंसीला**ति तादिससीला। **समाधिपक्खा**ति समाधि च समाधिपक्खा च समाधिपक्खा एकदेससरूपेकसेसनयेन। तत्थ **समाधिपक्खा**ति वीरियसतियो तदनुगुणा च धम्मा वेदितब्बा। झानसमापत्तीसु येभुय्येन विहारवोहारो, झानसमापत्तियो समाधिप्पधानाति वुत्तं **''समाधिपक्खानं धम्मानं गहितत्ता विहारो गहितो''**ति।

यथा पन हेट्ठा गहितापि समाधिपञ्ञा पटिपक्खतो विमुत्तत्ता विमुच्चन-सङ्खात-किच्चविसेस-दस्सनवसेन विमुत्तिपरियायेन पुन गहिता ''एवंविमुत्ता''ति, एवं दिब्बविहारो दिब्बविहारविसेसदस्सनवसेन पुन गहितो ''एवंविहारी''ति, तस्मा सब्बेसं समापत्तिविहारानं वसेनेत्थ अत्थो युज्जतीति दट्ठब्बं। **विमुत्तीति सङ्खं गच्छन्ति** विमुच्चित्थाति कत्वा। एस नयो सेसेसुपि। **पटिप्पस्सद्धन्ते**ति पटिप्पस्सम्भनोसापनेन। सब्बकिलेसेहि निस्सटत्ता असंसट्ठत्ता विमुत्तत्ता च **निस्सरणविमुत्ति** निब्बानं।

अनागतबुद्धानं पनाति **पन**-सद्दो विसेसत्थजोतनो। तेन अतीतेसु ताव खन्धानं भूतपुब्बत्ता तत्थ सिया ञाणस्स सविसये गति, अनागतेसु पन सब्बसो असञ्जातेसु कथन्ति इममत्थं जोतेति। तेनाह **''अनागतापी''**तिआदि। **''अत्तनो चेतसा परिच्छिन्दित्वा विदिता''**ति कस्मा वुत्तं? ननु अतीतानागते सत्ताहे एव पवत्तं चित्तं चेतोपरियञाणस्स विसयो, न ततो परन्ति? नयिदं चेतोपरियञाणकिच्चवसेन वुत्तं, अथ खो पुब्बेनिवासअनागतंसञाणानं वसेन वुत्तं, तस्मा नायं दोसो। **विदितट्ठाने न करोति** सिक्खापदेनेव तादिसस्स पटिक्खेपस्स पटिक्खित्तत्ता सेतुघाततो च। कथं पन थेरो द्वयसम्भवे

पटिक्खेपमेव अकासि, न विभज्ज ब्याकासीति आह **''थेरो किरा''**तिआदि। पारं परियन्तं मिनोतीति पारमी, सा एव ञाणन्ति पारमिञाणं, सावकानं पारमिञाणं **सावकपारमिञाणं**। तस्मिं सावकानं उक्कंसपरियन्तगते जानने नायमनुयोगो, अथ खो सब्बञ्ञुतञ्ञाणे सब्बञ्ञुताय जानने। केचि पन ''सावकपारमिञाणेति सावकपारमिञाणविसये''ति अत्थं वदन्ति, तथा सेसपदेसुपि। **सील...पे०... समत्थ**न्ति सीलसमाधिपञ्ञाविमुत्तिञाणसङ्खातानं कारणानं जाननसमत्थं। बुद्धसीलादयो हि बुद्धानं बुद्धकिच्चस्स परेहि एते बुद्धाति जाननस्स च कारणं।

अनुमानञाणं विय संसयट्ठितं अहुत्वा इदमिदन्ति यथासभावतो ञेय्यं धारेति निच्छिनोतीति **धम्मो,** पच्चक्खञाणन्ति आह **''धम्मस्स पच्चक्खतो ञाणस्सा''**ति। अनुएतीति **अन्वयो**ति आह **''अनुयोगं अनुगन्त्वा''**ति। पच्चक्खसिद्धञ्हि अत्थं अनुगन्त्वा अनुमानञाणस्स पवत्ति ''दिट्ठेन अदिट्ठस्स अनुमान''न्ति वेदितब्बा। विदिते वेदकम्पि ञाणं अत्थतो विदितमेव होतीति **''अनुमानञाणं नयग्गाहो विदितो''**ति वुत्तं। **विदितो**ति विद्धो पटिलद्धो, अधिगतोति अत्थो। **अप्पमाणो**ति अपरिमाणो महाविसयत्ता। तेनाह **''अपरियन्तो''**ति। **तेना**ति अपरियन्तत्ता। **तेन** वा अपरियन्तेन ञाणेन। एतेन थेरो यं यं अनुमेय्यमत्थं ञातुकामो होति, तत्थ तत्थ तस्स असङ्गमप्पटिहतं अनुमानञाणं पवत्तेतीति दस्सेति। तेनाह **''सो इमिना''**तिआदि। तत्थ **इमिना**ति इमिना कारणेन।

पाकारस्स थिरभावं उद्धमुद्धं आपेतीति **उद्धापं,** पाकारमूलं। **आदि**-सद्देन पाकारद्वारबन्धपरिखादीनं सङ्गहो वेदितब्बो। पच्चन्ते भवं **पच्चन्तिमं**। पण्डितदोवारिकट्ठानियं कत्वा थेरो अत्तानं दस्सेतीति दस्सेन्तो **''एकद्वारन्ति कस्मा आहा''**ति चोदनं समुट्ठापेसि।

यस्सा पञ्ञाय वसेन पुरिसो पण्डितोति वुच्चति, तं पण्डिच्चन्ति आह – **''पण्डिच्चेन समन्नागतो''**ति। तंतंइतिकत्तब्बतासु छेकभावो ब्यत्तभावो **वेय्यत्तियं**। मेधति अञ्ञाणं हिंसति विधमतीति मेधा, सा एतस्स अत्थीति **मेधावी**। ठाने ठाने उप्पत्ति एतिस्सा अत्थीति **ठानुप्पत्तिका,** ठानसो उप्पज्जनपञ्ञा। अनुपरियायन्ति एतेनाति अनुपरियायो, सो एव पथोति **अनुपरियायपथो,** परितो पाकारस्स अनुयायनमग्गो। पाकारभागा सम्बन्धितब्बा एत्थाति **पाकारसन्धि,** पाकारस्स फुल्लितपदेसो। सो पन हेट्ठिमन्तेन द्विन्नम्पि इट्ठकानं विगमेन एवं वुच्चतीति आह – **''द्विन्नं इट्ठकानं अपगतट्ठान''**न्ति। **छिन्नट्ठान**न्ति छिन्नभिन्नपदेसं, छिन्नट्ठानं वा। तञ्हि ''विवर''न्ति वुच्चति। **कीलिट्ठ**न्ति मलीनं। **उपतापेन्ती**ति किलेसपरिळाहेन सन्तापेन्ति। **विबाधेन्ती**ति पीळेन्ति। उप्पन्नाय पञ्ञाय नीवरणेहि न किञ्चि कातुं सक्काति आह **''अनुप्पन्नाय पञ्ञाय उप्पज्जितुं न देन्ती''**ति। **तस्मा**ति पच्चयूपघातेन उप्पज्जितुं अप्पदानतो। **चतूसु सतिपट्ठानेसु सुट्ठु ठपितचित्ता**ति चतुब्बिधायपि सतिपट्ठानभावनाय सम्मदेव ठपितचित्ता अप्पितचित्ता। **यथासभावेन भावेत्वा**ति याथावतो सम्मदेव यथा पटिपक्खा समुच्छिज्जन्ति, एवं भावेत्वा।

पुरिमनये सतिपट्ठानानि बोज्झङ्गा च मिस्सका अधिप्पेताति ततो अञ्ञथा वत्तुं **''अपिचेत्था''**तिआदि वुत्तं। **मिस्सका**ति समथविपस्सनामग्गवसेन मिस्सका। ''चतूसु सतिपट्ठानेसु सुप्पतिट्ठितचित्ताति पठमं वुत्तत्ता सतिपट्ठानेसु विपस्सनं गहेत्वा सत्त बोज्झङ्गे यथाभूतं भावेत्वाति वुत्तत्ता मग्गपरियापन्नानंयेव च नेसं निप्परियायबोज्झङ्गभावतो तेसु च अधिगतमेव होतीति बोज्झङ्गे मग्गो च सब्बञ्ञुतञ्ञाणञ्चाति गहिते सुन्दरो पञ्हो भवेय्या''ति **महासिवत्थेरो आह। न पनेवं गहितं** पोराणेहीति अधिप्पायो। **इती**ति वुत्तप्पकारपरामसनं। **थेरो**ति सारिपुत्तत्थेरो।

तत्थाति तेसु पच्चन्तनगरादीसु। **नगरं विय निब्बानं** तदत्थिकेहि उपगन्तब्बतो उपगतानञ्च परिस्सयरहितसुखाधिगमट्ठानतो। **पाकारो विय सीलं** तदुपगतानं परितो आरक्खभावतो। **अनुपरियायपथो विय हिरी**

सीलपाकारस्स अधिट्ठानभावतो। वुत्तञ्हेतं – ''परियायपथोति खो भिक्खु हिरिया एतं अधिवचन''न्ति। **द्वारं विय अरियमग्गो** निब्बाननगरप्पवेसने अञ्जसभावतो। **पण्डितदोवारिको विय धम्मसेनापति** निब्बाननगरं पविट्ठपविसनकानं सत्तानं सल्लक्खणतो। **दिन्नो**ति दापितो, सोधितोति अत्थो। सेसं सुविञ्ञेय्यमेव।

३. चुन्दसुत्तवण्णना

३७९. पुब्बे सावत्थितो वेळुवगामस्स गतत्ता वुत्तं **''आगतमग्गेनेव पटिनिवत्तन्तो''**ति। **सत्तन्न**न्ति उपसेनो, रेवतो, खदिरवनियो, चुन्दो, समणुद्देसो अहन्ति चतुन्नं, चाला, उपचाला, सीसूपचालाति, तिस्सन्नन्ति इमेसं सत्तन्नं अरहन्तानं। **नत्थि नु खो**ति एत्थापि ''ओलोकेन्तो''ति आनेत्वा सम्बन्धो सीहावलोकनञायेन। भविस्सन्ति मे वत्तारो हरितुं नासक्खीति सम्बन्धो। **इदं दानि पच्छिमदस्सन**न्ति भूतकथनमत्तं, न तत्थ सालयतादस्सनं यथा तथागतस्स वेसालिया निक्खमित्वा नागापलोकितं।

तस्स तस्स विसेसस्स अधिट्ठानवसेनेव इद्धिभेददस्सनं **इद्धिविकुब्बनं**। सीहस्स विजम्भनादिवसेन कीळित्वा नादसदिसी अयं धम्मकथाति वुत्तं **''सीहविकीळितो धम्मपरियायो''**ति। **गमनकालो मय्हन्ती**ति एत्थ **इति**-सद्दो परिसमापने। तेन थेरेन यथारम्भस्स वचनपबन्धस्स समापितभावं जोतेति। एस नयो सेसेसुपि एदिसेसु सब्बट्ठानेसु। युगन्धरादयो **परिभण्डपब्बता**ति वेदितब्बा। **एकप्पहारेनेवा**ति एकप्पहारेन इव। स्वायं **इव**-सद्दो न सक्कोमीति एत्थ आनेत्वा सम्बन्धितब्बो।

पटिपादेस्सामीति ठितकायं पटिपादेस्सामि। पत्थनाकाले अनोमदस्सिस्स भगवतो वचनसुतानुसारेन ञाणेन दिट्ठमत्ततं सन्धाय **''तं पठमदस्सन''**न्ति वुत्तं। **धारेतुं असक्कोन्ती** गुणसारं। **एस मग्गो**ति एसो जातानं सत्तानं मरणनिट्ठितो पन्थो। पुनपि **एवंभाविनो नाम सङ्खारा**ति सङ्खारा नाम एवंभाविनो, मरणपरियोसानाति अत्थो। **एत्तक**न्ति एत्तकं कालं। **सङ्कङ्खित्वा** संहरित्वा। **मुखं पिधाया**ति मुखं छादेत्वा। **अग्घिकसतानी**ति मकुळङ्कुरचेतियसतानि।

पुरिमदिवसेति अतीतदिवसे। यस्मा धम्मसेनापतिनो अरहत्तप्पत्तदिवसेयेव सत्थु सावकसन्निपातो अहोसि, तस्मा **''पूरितसावकसन्निपातो एस भिक्खू''**ति वुत्तं। **पञ्च जातिसतानी**ति भुम्मत्थे, अच्चन्तसंयोगे वा उपयोगवचनं।

कळोपिहत्थोति विलीवमयभाजनहत्थो। ''चम्ममयभाजनहत्थो''ति च वदन्ति। **पुरन्तरे**ति नगरमज्झे। **वने**ति अरञ्ञे।

ओसक्कनाकारविरहितोति धम्मदेसनाय सङ्कोचहेतुविरहितो। **विसारदो**ति सारदविरहितो। **धम्मोज**न्ति धम्मरसं, ओजवन्तं देसनाधम्मन्ति अत्थो। **धम्मभोग**न्ति धम्मपरिभोगं, परेहि सद्धिं संविभजनवसेन पवत्तं धम्मसम्भोगन्ति देसनाधम्ममेव वदति। तेन वुत्तं **''उभयेनपि धम्मपरिभोगोव कथितो''**ति।

पियायितब्बतो **पियेहि**। मनस्स वड्ढनतो **मनापेहि। जातिया**ति खत्तियादिजातिया। **नानाभावो** असहभावो विसुंभावो। **अञ्ञथाभावो** अञ्ञथत्तं। **सरीर**न्ति रूपधम्मकायसङ्खातं सरीरं। रूपकाये हि भिज्जन्ते भिज्जन्तेव। **सो भिज्जेय्या**ति सो महन्ततरो खन्धो भिज्जेय्य।

दक्खिणदिसं गतोति दक्खिणदिसामुखे पवत्तो। **महाखन्धो विया**ति महन्तो सारवन्तो साखाखन्धो विय।

साखखन्धा हि दिसाभिमुखपवत्ताकारा, मूलखन्धो पन उद्धमुग्गतो। **सोळसन्नं पञ्हान**न्ति सोळसन्नं अपरापरियपवत्तनियानं अत्थानं। ञातुं इच्छितो हि अत्थो पञ्हो।

४-५. उक्कचेलसुत्तादिवण्णना

३८०-३८१. अमावसुपोसथेति अमावसिउपोसथे, कालपक्खउपोसथेति अत्थो। **पुरिमनयेनेवा**ति अनन्तरसुत्ते वुत्तनयेनेव।

६. उत्तियसुत्तवण्णना

३८२. मच्चुधेय्यस्साति मच्चुनो पवत्तिट्ठानस्स।

८. ब्रह्मसुत्तवण्णना

३८४. तस्मिं कालेति पठमाभिसम्बोधियं। **भिक्खुयेव नत्थि** धम्मचक्कस्स अप्पवत्तितत्ता, **भिक्खुयेव** भिक्खुलक्खणयोगतो। एकको मग्गो, न द्वेधापथभूतोति एकमग्गो, तं **एकमग्गं**। जातिया खयो वट्टदुक्खस्स अन्तभूतोति जातिक्खयन्तो, निब्बानं, तं दिट्ठत्ता **जातिक्खयन्तदस्सी**ति एवमेत्थ अत्थो दट्ठब्बो।

९. सेदकसुत्तवण्णना

३८५. अयं तस्स लद्धीति अयं इदानि वुच्चमाना तस्स आचरियस्स लद्धि। **ततो अनामेन्तो**ति येन वंसो नमति, तेन कायं अनामेन्तो। तथा नमन्तो हि पतित्वा चुण्णविचुण्णं होति। **त**न्ति कायं, **तं** वंसं वा। **आकड्ढेन्तो विया**ति नमितट्ठानतो परभागेन आकड्ढेन्तो विय। **एकतोभागियं कत्वा**ति यथावुत्तं सतिं सूपट्ठितं कत्वा ओनतं विय कत्वा। तथा करणं पन तथा वातूपत्थम्भगाहापनेनाति आह – ''**वातूपत्थम्भं गाहापेत्वा**''ति। तञ्च सतिया तदत्थं उपट्ठानेनाति वुत्तं ''**सतिं सूपट्ठितं कत्वा**''ति। **निच्चलोव निसीदन्तो** अन्तेवासी **आचरियं रक्खति,** एत्तकं आचरियस्स लद्धिवसेन वुत्तं। ''**आचरियो वंसं सुग्गहितं गण्हन्तो**''तिआदि सब्बं हेट्ठा वुत्तनयमेव।

''**अत्तानमेव रक्खती**''ति इदं अत्तनो रक्खणं पधानं कत्वा वुत्तं, **न अन्तेवासिक**न्ति अवधारणफलं। अत्तरक्खाय पनेत्थ सिज्झमानाय अन्तेवासिकरक्खापि सिद्धा एव होतीति। दुतियपक्खेपि एसेव नयो। **सो तत्थ ञायो**ति या अत्तनो एव रक्खा, सा अत्थतो पररक्खापि होतीति अयमेत्थ ञायो युत्तप्पयोगो। **अनुवड्ढिया**ति यथावड्ढितस्स अनुअनुवड्ढिया। एतेन पटिलद्धसम्पयुत्तपमोदनाकारो दस्सितोति आह – ''**सपुब्बभागाय मुदितायाति अत्थो**''ति। **आसेवनाया**तिआदीनि पदानि अनुदयतापरियोसानानि (यस्मा सतिपट्ठानं सेवन्तस्स सिद्धं अत्तनो च परस्स च रक्खणं पकासेन्ति, तस्मा) – ''अत्तानं, भिक्खवे, रक्खिस्सामीति सतिपट्ठानं सेवितब्ब''न्तिआदि वुत्तं।

१०. जनपदकल्याणीसुत्तवण्णना

३८६. जनपदस्मिं कल्याणीति सकलजनपदे भद्दा रूपसम्पत्तिया सिक्खासम्पत्तिया च सुन्दरा सेट्ठा। रूपसम्पत्ति च नाम सब्बसो रूपदोसाभावेन रूपगुणपारिपूरिया होतीति तदुभयं दस्सेतुं ''**छसरीरदोसरहिता पञ्चकल्याणसमन्नागता**''ति वुत्तं। तं दुविधम्पि विवरन्तो ''**सा ही**''तिआदिमाह। **पञ्चकल्याणसमन्नागता**ति

पञ्चविधसरीरगुणसम्पदाहि समन्नागता। **नातिदीघा नातिरस्सा**ति पमाणमज्झिमा दीघतरप्पमाणा न होति, न अतिरस्सा, लकुण्डकरूपा न होति। **नातिकिसा**ति अतिविय किसथद्धमंसलोहिता दिस्समाना अट्ठिसरीरा जालसरीरा न होति। **नातिथूला**ति भारियमंसा महोदरा न होति। **नातिकाळा नाच्चोदाता**ति अतिविय काळवण्णा झामङ्गारो विय, दधितक्कादीहि पमज्जितमत्तकंसलोहवण्णा न होति। मनुस्सलोके तादिसिया रूपसम्पत्तिया अभावतो **अतिक्कन्ता मनुस्सवण्णं**। यथा पमाणयुत्ता, एवं आरोहपरिणाहयोगतो च परेसं पसादावहा नातिदीघतादयो। एवं मनुस्सानं दिब्बरूपतासम्पत्तीपीति वुत्तं "**अप्पत्ता दिब्बवण्ण**"न्ति। एत्थ च नातिदीघनातिरस्सतावचनेन आरोहसम्पत्ति वुत्ता उब्बेधेन पासादिकभावतो। किसथूलदोसाभाववचनेन परिणाहसम्पत्ति वुत्ता। उभयेनपि सण्ठानसम्पदा विभाविता, नातिकाळतावचनेन वण्णसम्पत्ति वुत्ता विवण्णताभावतो। **पियङ्गुसामा**ति परिणतपियङ्गुपुप्फसदिससरीरनिभासा। **मुखपरियोसान**न्ति अधरोट्ठमाह। **अयं** यथावुत्ता सरीरवण्णसम्पत्ति। **अस्सा**ति जनपदकल्याणिया। **छविकल्याणता** छविसम्पत्तिहेतुकत्ता तस्सा। एस नयो सेसेसुपि। नखा एव पत्तसदिसताय **नखपत्तानि**।

(**पसावो** सरीरावयवेन इरियनन्ति आह – "**पवत्तीति अत्थो**"ति, पसावो यथापरितमेव कनतन्ति, न सभावसन्धानं। यथाविभावसेन **उत्तममेव नच्चं नच्चति**। ते वा वीसतियासूतिरं धानप्पत्तिया पवत्तिया पवत्तिमकतमन्दता विभावसुटतस्स उत्तममेव गीतञ्च गायतीति अत्थो।) [एत्थन्तरे पाठो असुद्धो दुस्सोधनीयो च। सुद्धपाठो गवेसितब्बो।] **समतित्तिको तेलपत्तो**ति मुखवत्तिसमं तेलानं पूरितत्ता समतित्तिकमुखं तेलभाजनं। **अन्तरेन च महासमज्जं अन्तरेन च जनपदकल्याणि**न्ति जनपदकल्याणिया, तस्सा च नच्चगीतं पेक्खितुं सन्निपतितमहाजनसमूहस्स मज्झतो **परिहरितब्बो** नेतब्बो। **न**न्ति तेलं। **आहरेय्या**ति आपज्जेय्य। तत्रिदं ओपम्मसंसन्दनं – तेलपत्तं विय कायगतासति, तस्स परिहरणपुग्गलो विय विपस्सको, जनकाया विय पुथुत्तारम्मणानि, असिपुरिसो विय मनो, तेलस्स चजनं विय किलेसुप्पादनं, सीसपातनं विय अरियमग्गञाणसीसानुप्पत्ति। "कायगता सति नो भाविता...पे०... सिक्खितब्ब"न्ति वुत्तत्ता "**पुब्बभागविपस्सनाव कथिता**"ति वुत्तं।

नालन्दवग्गवण्णना निट्ठिता।

३. सीलट्ठितिवग्गो

१-२. सीलसुत्तादिवण्णना

३८७-३८८. सीलानीति बहुवचनं अनेकविधत्ता सीलस्स। तञ्हि सीलनट्ठेन एकविधम्पि चारित्तादिवसेन अनेकविधं। तेनाह – "**चतुपारिसुद्धिसीलानी**"ति। **पञ्हमग्गो**ति ञातुं इच्छितस्स अत्थस्स वीमंसनं। तेनाह – "**पञ्हगवेसन**"न्ति।

३-५. परिहानसुत्तादिवण्णना

३८९-३९१. पुग्गलवसेन परिहानं होति न धम्मवसेन। यो न भावेति, तस्सेव परिहायति। तेनाह "**यो ही**"तिआदि।

६. पदेससुत्तवण्णना

३९२. पदेसतो भावितत्ताति एकदेसतो भावितत्ता भावनापारिपूरिया अननुप्पत्तत्ता। तेनाह – "**चत्तारो हि**

मग्गे''तिआदि।

७. समत्तसुत्तवण्णना

३९३. समत्ता भावितत्ताति परियत्ता भावितत्ता।

८-१०. लोकसुत्तादिवण्णना

३९४-३९६. महाविसयत्ता महतियो अभिञ्ञा एतस्साति **महाभिञ्ञो,** तस्स भावोति सब्बं वत्तब्बं। ''**सततविहारवसेन वुत्त**''न्ति वत्वा तमत्थं पाकटं कातुं ''**थेरो किरा**''तिआदि वुत्तं। **तस्सा**ति थेरस्स। **आवज्जनस्स गति**न्ति एकावज्जनस्सेव गमनवीथिं। **अनुबन्धति** चक्कवाळानं सहस्सं एकावज्जनेनेव सहस्सलोकधातुया इच्छितमत्थं जानितुं समत्थोति दस्सेति।

सीलट्ठितिवग्गवण्णना निट्ठिता।

४. अननुस्सुतवग्गवण्णना

३९७-४०७. या वेदना सम्मसित्वाति या तेभूमकवेदना सम्मसित्वा। **तावस्सा**ति ता तेभूमकवेदना एव अस्स भिक्खुनो। सदिसवसेन चेतं वुत्तं, अनिच्चादिसम्मसनवसेन **विदिता** पुब्बभागे सम्मसनकाले **उपट्ठहन्ति। परिग्गहितेसू**ति परिजाननवसेन परिच्छिज्ज गहितेसु। ''**वेदना** तण्हापपञ्चस्स, **वितक्को** मानपपञ्चस्स, **सञ्ञा** दिट्ठिपपञ्चस्स मूलवसेन सम्मसनं वुत्ता''ति वदन्ति। ''वेदनावितक्कसञ्ञा तण्हामानदिट्ठिपपञ्चानं मूलदस्सनवसेना''ति अपरे।

अननुस्सुतवग्गवण्णना निट्ठिता।

५. अमतवग्गो

२. समुदयसुत्तवण्णना

४०८. सारम्मणसतिपट्ठानाति आरम्मणलक्खिता सतिपट्ठाना कथिता, न सतिलक्खणा।

४. सतिसुत्तवण्णना

४१०. सुद्धिकं कत्वा विसुं विसुं कत्वा। तथा च वुत्तं पाळियं ''काये वा भिक्खू''ति।

६. पातिमोक्खसंवरसुत्तवण्णना

४१२. जेट्ठकसीलन्ति पधानकसीलं। सीलग्गहणञ्हि पाळियं पातिमोक्खसंवरवसेनेव आगतं। तेनाह ''**तिपिटकचूळनागत्थेरो पना**''तिआदि। तत्थ **पातिमोक्खसंवरोव सील**न्ति अवधारणं इतरेसं तिण्णं एकदेसेन पातिमोक्खन्तोगधभावं दीपेति। तथा हि अनोलोकियोलोकने आजीवहेतु च छसिक्खापदवीतिक्कमने गिलानपच्चयस्स अप्पच्चवेक्खितपरिभोगे च आपत्ति विहिताति। **तीणीति** इन्द्रियसंवरादीनि। **सीलन्ति वुत्तट्ठानं नाम नत्थी**ति

सीलपरियायेन तेसं कत्थचि सुत्ते गहितट्ठानं नाम नत्थीति निप्परियायसीलतं तेसं पटिक्खिपति। **छद्वाररक्खणमत्तमेवा**ति तस्स सल्लहुकतमाह चित्ताधिट्ठानमत्तेन पटिपाकतिकभावप्पत्तितो। इतरद्वयेपि एसेव नयो। **पच्चयुप्पत्तिमत्तक**न्ति फलेन हेतुं दस्सेति। उप्पादनहेतुका हि पच्चयानं उप्पत्ति। **इदमत्थ**न्ति इदं पयोजनं इमस्स पच्चयस्स परिभुञ्जनेति अधिप्पायो। **निप्परियायेना**ति इमिना इन्द्रियसंवरादीनि तीणि पधानसीलस्स परिपालनपरिसोधनवसेन पवत्तिया परियायसीलानि नामाति दस्सेति। इदानि पातिमोक्खसीलस्सेव पधानभावं ब्यतिरेकतो अन्वयतो च उपमाय विभावेतुं **''यस्सा''**तिआदिमाह। तत्थ **सो**ति पातिमोक्खसंवरो। **सेसानि** इन्द्रियसंवरादीनि। पातिमोक्खसद्दस्स अत्थो पन विसुद्धिमग्गसंवण्णनादीसु वित्थारितो, तस्मा तत्थ वुत्तनयेनेव वेदितब्बो।

आचारेन च गोचरेन च सम्पन्नोति कायिकचेतसिकअवीतिक्कमसङ्खातेन आचारेन च नवेसियादिगोचरतादिसङ्खातेन गोचरेन च सम्पन्नो, सम्पन्नआचारगोचरोति अत्थो। **अप्पमत्तकेसू**ति अतिपरित्तकेसु अनापत्तिगमनीयेसु। ''दुक्कटदुब्भासितमत्तेसू''ति अपरे। **वज्जेसू**ति अकरणीयेसु गारय्हेसु। ते पन एकन्ततो अकुसला होन्तीति आह – **''अकुसलधम्मेसू''**ति। **भयदस्सावी**ति भयतो दस्सनसीलो, परमाणुमत्तम्पि वज्जं सिनेरुप्पमाणं विय कत्वा दस्सनसीलो। **सम्मा आदियित्वा**ति सम्मदेव सक्कच्चं सब्बसो च आदियित्वा। **सिक्खापदेसूति निद्धारणे भुम्म**न्ति समुदायतो अवयवनिद्धारणं दस्सेन्तो **''सिक्खापदेसु तं तं सिक्खापद''**न्तिआदिमाह। सिक्खापदं समादातब्बं सिक्खितब्बञ्चाति अधिप्पायो। **सिक्खा**ति अधिसीलसिक्खा। पुब्बे **पद**-सद्दो अधिट्ठानट्ठो, इध भागत्थोति दट्ठब्बन्ति आह – **''सिक्खाकोट्ठासेसू''**ति। मूलपञ्ञत्तिअनुपञ्ञत्तिआदिभेदं यंकिञ्चि सिक्खितब्बं पूरेतब्बं सीलं, तं पन द्वारवसेन दुविधमेवाति आह – **''कायिकं वा वाचसिकं वा''**ति। इमस्मिं अत्थविकप्पे **सिक्खापदेसू**ति आधारे भुम्मं सिक्खाभागेसु कस्सचि विसुं अग्गहणतो। तेनाह – **''तं तं सब्ब''**न्ति। ''ततो त्वं भिक्खु सीलं निस्साया''ति वचनतो अनभिज्झा अब्यापादसम्मादिट्ठियोपि सीलन्ति वुत्ता, तस्मा इमस्मिं सुत्ते **''पातिमोक्खसंवरसीलमेव कथित''**न्ति वुत्तं।

७. दुच्चरितसुत्तवण्णना

४१३. एत्थापि मनोसुचरितं सीलं नामाति दस्सेतीति कत्वा वुत्तं **''पच्छिमापि तयो''**ति। अनभिज्झाअब्यापादसम्मादिट्ठिधम्मा सीलं होतीति वेदितब्बा कायवचीसुचरितेहि सद्धिं मनोसुचरितम्पि वत्वा ''ततो त्वं भिक्खु सीलं निस्साय सीले पतिट्ठाया''ति वुत्तत्ता। **सेसं** वुत्तनयमेव। **छट्ठसत्तमेसू**ति छट्ठसत्तमवग्गेसु अपुब्बं नत्थि। तेन वुत्तं **''हेट्ठा वुत्तनयेनेव अत्थो वेदितब्बो''**ति। वग्गपेय्यालतो पन इमस्मिं सतिपट्ठानसंयुत्ते कतिपयवग्गा सङ्गहं आरूळ्हा, तथापि तेसं अत्थविसेसाभावतो एकच्चेसु पोत्थकेसु मुखमत्तं दस्सेत्वा संखित्ता, एकच्चेसु अतिसंखित्ताव, ते सङ्खेपवसेन द्वे कत्वा **''छट्ठसत्तमेसू''**ति वुत्तं।

अमतवग्गवण्णना निट्ठिता।

सतिपट्ठानसंयुत्तवण्णना निट्ठिता।

४. इन्द्रियसंयुत्तं

१. सुद्धिकवग्गो

६. सद्धिकसुत्तवण्णना

४७१. चतुभूमक ...पे०... लब्भन्ति कुसलाब्याकतभावतो तेसं तिण्णं इन्द्रियानं। **वीरियिन्द्रियसमाधिन्द्रियानि... पे०... सब्बत्थ लब्भन्ति** कुसलत्तिकसाधारणत्ता। **चतुभूमक ...पे०... वसेना**ति चतुभूमकधम्मपरिच्छेदवसेन चेव कुसलादीहि सब्बसङ्गाहकधम्मपरिच्छेदवसेन च वुत्तन्ति अत्थो।

दुतियसमणब्राह्मणसुत्तवण्णना

४७७. दुक्खसच्चवसेनाति दुक्खसच्चभावेन न पजानन्ति। तञ्हि परिञ्ञेय्यताय दुक्खसच्चसङ्गहं। **समुदयसच्चवसेना**ति तण्हाविज्जादिं सद्धिन्द्रियस्स समुदयसच्चभावेन न पजानन्ति। **निरोध**न्ति सद्धिन्द्रियस्स अनुपादाय निरोधनिमित्तं निब्बानं। **पटिपद**न्ति सद्धिन्द्रियनिरोधगामिनिं पटिपदं अरियमग्गं। **सेसेसू**ति वीरियिन्द्रियादीसु।

सुक्कपक्खेति ''सद्धिन्द्रियं पजानन्ती''तिआदिनयप्पवत्ते अनवज्जपक्खे। **अधिमोक्खवसेन आवज्जनसमुदया**ति ''अत्थि दिन्न''न्तिआदिनयप्पवत्तपुब्बभागभूतसद्धाधिमोक्खवसेन आवज्जनुप्पत्तिया। तस्मा पठमुप्पन्ना सद्धा एव हेत्थ ''आवज्जन''न्ति वुत्ता, न मनोद्वारावज्जनं। एस नयो सेसेसुपि। तस्मा पठमुप्पन्ना आवज्जना पग्गहुप्पत्तिट्ठानानं तिक्खानं वीरियिन्द्रियादीनं पठमुप्पत्तिया आवज्जनपरियायेन वुत्ताति दट्ठब्बं। दुब्बला हि पठमुप्पन्ना पग्गहाभावतो वीरियिन्द्रियादीनं समुदयोति बलवभावप्पत्तवीरियिन्द्रियादिकस्स आवज्जनट्ठानियानि होन्तीति तेसं समुदयोति वुत्ता, पुब्बे अधिमुच्चनादिवसेन पवत्तस्स आवज्जनस्स समुदयाति अत्थो। पुन **छन्दवसेना**ति कत्तुकामताकुसलच्छन्दवसेन सद्धादीनं उप्पादेतुकामताकारप्पवत्तस्स छन्दस्स वसेन। **मनसिकारवसेन आवज्जनसमुदया**ति सद्धिन्द्रियादिवसेन पवत्तस्स दुब्बलस्स तस्स निब्बत्तकयोनिसोमनसिकारवसेन आवज्जनस्स उप्पत्तिया। **एवम्पी**ति ''अधिमोक्खवसेना''तिआदिना वुत्ताकारेनपि। **छसु सुत्तेसू**ति दुतियतो पट्ठाय छसु सुत्तेसु। **चतुसच्चमेव कथितं**। अस्सादग्गहणेन हि समुदयसच्चं, आदीनवग्गहणेन दुक्खसच्चं, निस्सरणग्गहणेन निरोधमग्गसच्चानि गहितानीति। पठमसुत्ते पन इन्द्रियानं सरूपदस्सनमेवाति।

८. दब्बसुत्तवण्णना

